श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ त्रिषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिषष्टितमः सर्गः ॥

## श्रीरामेण शत्रुघ्नस्य मधुराराज्येऽभिषेचनं लवणशूलादात्मरक्षां कर्तुमुपायस्य तं प्रति कथनं च

एवमुक्तस्तु रामेण परां व्रीडामुपागमत्।
शत्रुघ्नो वीर्यसम्पन्नो मन्दं मन्दमुवाच ह ॥ **7.63.1** ॥

अधर्मं विद्म काकुत्स्थ अस्मिन्नर्थे नरेश्वर।
कथं तिष्ठत्सु ज्येष्ठेषु कनीयानभिषिच्यते ॥ **7.63.2** ॥

अवश्यं करणीयं च शासनं पुरुषर्षभ।
तव चैव महाभाग शासनं दुरतिक्रमम् ॥ **7.63.3** ॥

त्वत्तो मया श्रुतं वीर श्रुतिभ्यश्च मया श्रुतम्।
नोत्तरं हि मया वाच्यं मध्यमे प्रतिजानति ॥ **7.63.4** ॥

व्याहृतं दुर्वचो घोरं हन्तास्मि लवणं मृधे।
तस्यैवं मे दुरुक्तस्य दुर्गतिः पुरुषर्षभ ॥ **7.63.5** ॥

उत्तरं नहि वक्तव्यं ज्येष्ठेनाभिहिते पुनः।
अधर्मसहितं चैव परलोकविवर्जितम् ॥ **7.63.6** ॥

सोऽहं द्वितीयं काकुत्स्थ न वक्ष्यामीति चोत्तरम्।
मा द्वितीयेन दण्डो वै निपतेन्मयि मानद ॥ **7.63.7** ॥

कामकारो ह्यहं राजंस्तवास्मि पुरुषर्षभ।
अधर्मं जहि काकुत्स्थ मत्कृते रघुनन्दन॥ **7.63.8**॥

एवमुक्ते तु शूरेण शत्रुघ्नेन महात्मना।
उवाच रामः संहृष्टो भरतं लक्ष्मणं तथा॥ **7.63.9**॥

सम्भारानभिषेकस्य आनयध्वं समाहिताः।
अद्यैव पुरुषव्याघ्रमभिषेक्ष्यामि राघवम्॥ **7.63.10**॥

पुरोधसं च काकुत्स्थ नैगमानृत्विजस्तथा।
मन्त्रिणश्चैव तान् सर्वानानयध्वं ममाज्ञया॥ **7.63.11**॥

राज्ञः शासनमाज्ञाय तथाकुर्वन्महारथाः।
अभिषेकसमारम्भं पुरस्कृत्य पुरोधसम्॥ **7.63.12**॥

प्रविष्टा राजभवनं राजानो ब्राह्मणास्तथा।
ततोऽभिषेको ववृधे शत्रुघ्नस्य महात्मनः॥ **7.63.13**॥

सम्प्रहर्षकरः श्रीमान् राघवस्य पुरस्य च।
अभिषिक्तस्तु काकुत्स्थो बभौ चादित्यसन्निभः॥ **7.63.14**॥

अभिषिक्तः पुरा स्कन्दः सेन्द्रैरिव दिवौकसैः।
अभिषिक्ते तु शत्रुघ्ने रामेणाक्लिष्टकर्मणा॥ **7.63.15**॥

पौराः प्रमुदिताश्चासन् ब्राह्मणाश्च बहुश्रुताः।
कौसल्या च सुमित्रा च मङ्गलं केकयी तथा॥ **7.63.16**॥

चक्रुस्ता राजभवने याश्चान्या राजयोषितः।
ऋषयश्च महात्मानो यमुनातीरवासिनः॥ **7.63.17**॥

हतं लवणमाशंसुः शत्रुघ्नस्याभिषेचनात्।
ततोऽभिषिक्तं शत्रुघ्नमङ्कमारोप्य राघवः।
उवाच मधुरां वाणीं तेजस्तस्याभिपूरयन्॥ **7.63.18** ॥

अयं शरस्त्वमोघस्ते दिव्यः परपुरञ्जयः।
अनेन लवणं सौम्य हन्तासि रघुनन्दन॥ **7.63.19** ॥

सृष्टः शरोऽयं काकुत्स्थ यदा शेते महार्णवे।
स्वयम्भूरजितो दिव्यो यं नापश्यन् सुरासुराः॥ **7.63.20** ॥

अदृश्यः सर्वभूतानां तेनायं हि शरोत्तमः।
सृष्टः क्रोधाभिभूतेन विनाशार्थं दुरात्मनोः॥ **7.63.21** ॥

मधुकैटभयोर्वीर विघाते सर्वरक्षसाम्।
स्रष्टकामेन लोकांस्त्रींस्तौ चानेन हतौ युधि॥ **7.63.22** ॥

तौ हत्वा जनभोगार्थे कैटभं तु मधुं तथा।
अनेन शरमुख्येन ततो लोकांश्चकार सः॥ **7.63.23** ॥

नायं मया शरः पूर्वं रावणस्य वधार्थिना।
मुक्तः शत्रुघ्न भूतानां महान् हासो भवेदिति॥ **7.63.24** ॥

यच्च तस्य महच्छूलं त्र्यम्बकेण महात्मना।
दत्तं शत्रुविनाशाय मधोरायुधमुत्तमम्॥ **7.63.25** ॥

तत् सन्निक्षिप्य भवने पूज्यमानं पुनः पुनः।
दिशः सर्वाः समासाद्य प्राप्नोत्याहारमुत्तमम्॥ **7.63.26** ॥

यदा तु युद्धमाकाङ्क्षन् कश्चिदेनं समाह्वयेत्।
तदा शूलं गृहीत्वा तु भस्म रक्षः करोति हि॥ **7.63.27** ॥

स त्वं पुरुषशार्दूल तमायुधविनाकृतम्।
अप्रविष्टं पुरं पूर्वं द्वारि तिष्ठ धृतायुधः॥ **7.63.28** ॥

अप्रविष्टं च भवनं युद्धाय पुरुषर्षभ।
आह्वयेथा महाबाहो ततो हन्तासि राक्षसम्॥ **7.63.29** ॥

अन्यथा क्रियमाणे तु ह्यवध्यः स भविष्यति।
यदि त्वेवं कृतं वीर विनाशमुपयास्यति॥ **7.63.30** ॥

एतत् ते सर्वमाख्यातं शूलस्य च विपर्ययः।
श्रीमतः शितिकण्ठस्य कृत्यं हि दुरतिक्रमम्॥ **7.63.31** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रिषष्टितमः सर्गः॥